# श्रीसत्यप्रमोदतीर्थस्तुतिः

सत्याभिज्ञकराब्जोत्थान् पञ्चाशद्वर्षपूजकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१॥

सुधापण्डितनिर्मातॄन् सुधापण्डितपोषकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२॥

पञ्चाशद्वर्षपर्यन्तं मूलरामपदार्चकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥३॥

व्यासाशाजेतृरामादिमहापचितिभूषितान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥४॥

भारतादिमहाशास्त्रपारायणपरायणान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥५॥

सुवर्णरजतागारमहादानादितत्परान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥६॥

आसेतोरातुषाराद्रेस्तीर्थयात्राविधायकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥७॥

विशीर्णजीर्णबहुळभवनोद्धारकारकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥८॥

नूतनानेकभवनस्थापकान् भुवि सादरम् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥९॥

दुर्मिळप्राच्यसद्ग्रन्थसङ्ग्राहकधुरन्धरान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१०॥

अर्चारहितसारार्चासारार्चनसुदीक्षितान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥११॥

विष्णुपञ्चकसत्काष्ठमौनादिव्रतपावनान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१२॥

तन्त्रसारोक्तनिश्शेषमन्त्रावर्तनवर्तनान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१३॥

दुर्वादिमत्तकुम्भीन्द्रकुम्भभेदविशारदान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१४॥

महाभारतनिर्णीतिशतावृत्तिसमुद्भवान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१५॥

आयुरारोग्यसद्विद्यासम्पत्सन्ततिभाग्यदान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१६॥

हीरहाटकतारादिभूषणादिसमर्पकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१७॥

वैराग्यभाग्यान् वैराग्यभाग्यान् वैराग्यतर्पितान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१८॥

तपसा निर्जिताशेषबाह्याभ्यन्तरशात्रवान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥१९॥

गुणाचारैकसद्धामकरुणावरुणालयान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२०॥

प्रत्येकपदपद्यादिप्रभूतार्थप्रकाशकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२१॥

वाचा प्रसन्नगाम्भीर्ययुतया जनबोधकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२२॥

तपःपुण्यनिधीन् शान्तिदमादिगुणवारिधीन् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२३॥

श्रीनिवासश्रीनिवासतीर्थदर्शनतीर्थितान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२४॥

स्थापकान् जयतीर्थीयविद्यापीठस्य तापसान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२५॥

सत्यप्रमोदनिधिना सत्यामोदप्रदान् निधीन् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२६॥

स्वरूपोद्धारकृद्वर्यान् सत्स्वरूपोपदेशकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२७॥

तीर्थभक्तिसुसम्पूर्णान् तीर्थभक्तिप्रदान् प्रदान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२८॥

मन्त्रमुद्रादिदानेन विष्णुदीक्षाप्रदायकान् ।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान् ॥२९॥

सत्यात्मभिक्षुरचिता स्तुतिर्ज्ञानादिवृद्धिदा ।
पठतां शृण्वतां चैव श्रद्धया गुर्वनुग्रहात् ॥३०॥

।। इति श्रीसत्यप्रमोदतीर्थस्तुतिः ।।